Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६६६-ध

Title शिवमहिम्नः स्तोत्रम्

Author पुष्पदन्ताचार्यः

Extent १८ Age

Subject स्तोत्रम् · सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१८ ५५(

नं० ६६६ - घ

शिवमहिम्नः स्तोत्रम् (सटीकम्) (स्तोत्रम्)

पत्राणि १-८ (सम्पूर्णम्)

नं० ५५५ - घ

कर्ता पुष्पदन्ताचार्य:

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६६६-ख

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ श्रीगणेशायनमः ॐ एवंकिलव्याख्यायते कश्चित्किलगं
१ धर्वराजः कस्यचिद्राज्ञः प्रमदवनकुसुमानिहरन्नासीत् तन्ना
त्याचशिवनिर्माल्यलंघनेनमनुष्यचोरस्यांतर्ध्यानादिशक्ति
र्विनंक्ष्यतीत्यभिप्रायेणराज्ञः शिवनिर्माल्यंपथिनिक्षिप्तं तद
प्रतिसंधायगंधर्वराजस्तत्रप्रविशन्नेवकुंठशक्तिर्बभूव त
तश्चशिवनिर्माल्यलंघनेनैवममैतादृशंवैकुंठ्यंइतिप्रणि
धानेनविदित्वापरमकारुणिकंभगवंतंसर्वकामदंतमेवतु
ष्टाव ननुस्तुतिर्नामकथनंतच्चगुणज्ञानाधीनंअज्ञातस्य
कथनासंभवात् तथाचभगवतोगुणानामनंतत्वेनज्ञातुम
शक्यत्वात् कथंतत्कथनरूपास्तुतिरनुरूपाभवेत् अननु
रूपकरणेचोपहासायैवेतिपाशंकापनोदनव्याजेनस्वस्या शिव
नौद्धत्यंदर्शयन्नेवंभगवंतंस्तोतुमारभे ॐश्रीगुरवेस्तुगो १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पवर्गीयो द्वीरं यत्पादाब्जाविलोकनम्‌ यन्नास्यावेक्षणं श्रीदं तं
वंदे धरणीधरं १ महिम्नेति हे भगवन्‌ ते तव महिम्नः परं पा
रं अत्यर्थं अवसानं अविदुषः पुंसः अजानन् पुरुषस्य स्तुतिर्य
दि असदृशी स्यात्‌ अननुरूपा अयोग्या भवेत्‌ न तदा ब्रह्मादी
नामपि गिरस्त्वयि विषये अवसन्नाः भवेयुः निष्फला भवंति

ॐ महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः

तत्तस्मात्कारणात्‌ न केवलमस्माकमेव स्तुतेरनधिकारत्वं
ब्रह्मादेरपि तथैव स्यादित्यार्थः एतेन पूर्वार्धेन स्तुतेरनधिका
रत्वं प्रतिपादितं उत्तरार्धेन साधिकारत्वं प्रतिपाद्यते अथैवं
ब्रूषे यत्सर्वः समस्तो जनः स्वमतिपरिणामावधिस्वकीयायाः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ स्तुत्याः परिणामः परिपाकः स एवावधिर्यथा भवति तथा त्वां
२ गृणन् स्तुवन् अपवाच्योऽनलपनीयोऽनुग्राह्यो भवतिर्यैवं त घे२
2 र्हि हे हर अस्मिन् स्तोत्रे ममापि एषः परिकरः प्रारंभो निरपवा
दनिर्दोष एव १ अतीतेति हे भगवन् यतस्तव महिमा वाङ्मन

अथावाच्यः सर्वः स्वमतिपरिणामावधिगृणन्
ममाप्येष स्तोत्रे हरनिरपवादः परिकरः १

सयोः पंथानं अतीत एव वाङ्मनस्य वाङ्मनसीतयोर्वाङ्मनस
योः एते किल वाङ्मनसी सर्वार्थविषयणी ताभ्यामपि तव महि
मा अदधा रयितुं परिज्ञातुं न शक्यते न च प्रत्यक्षेणानुमानेन ग्र
ह्यते सः कः यं तव महिमानं श्रुतिरपि वेदोऽपि चकितं अभिधत्ते शिव
भीतभीतं ब्रूते न निश्चयतः कथा अतद्व्यावृत्या न ततू अनत्॥ २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अतद्रूपा चासौ व्यावृत्तिश्च अतद्व्यावृत्तिस्तयोसः इत्थंभूतो महि
मा कस्य स्तोतव्यः अपितु न कस्यापीत्यर्थः तथा कतिविधगुणक
स्य भगवतो किंपंनो गुणाः न स परिज्ञातुं न शक्यते कस्य विषयः क
स्य गोचरो भगवान् न कस्यापीत्यर्थः एतेन निष्कलस्वरूपेण

अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं च
कितमभिधत्ते श्रुतिरपि स कस्य स्तोतव्यः कतिविधगु
णः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः २

स्के तेरनधिकारत्वं प्रतिपादितं सकलेसाधकात्रास्यमस्तीति प्र
तिपादयन्नाह तु पुनः अर्वाचीने स्वच्छे स्थिति प्रतये त्वया पदे
स्थाने कस्य मनः न पतति वचो वाक् कस्य न प्रसरति अपितु
सर्वेषामपि मनो वचः पतति २ श्रीभगवतो शेषशास्त्र क
र्तृत्वप्रतिपादनाय आम्नायस्य पपरिहारायस्तुवन्नाह मा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म·टी· धुस्फीतेति हेभगवनूममस्तुत्यातवतुष्टिर्नास्त्येव किंकुर्वत
३ स्तवयावाचोगिरोनिर्मितेवतःस्रष्टवतःकथंभूतावाचःमधु
3 स्फीतामधुवत्स्फीताःकोमलाःमाधुर्य्यगुणयुक्ताःसालंका
राःपुनःकथंभूताःपरमंअमृतंपरमामृतस्वरूपास्तत्तथो।
च्यंतेउपचाराद्दूरंतासिस्वांतनिष्ठाएतेनकिमुक्तंएवंविधास्व

मधुस्फीतावाचःपरमममृतंनिर्मितवतस्तवब्रह्मन्किंवा
गपिसुरगुरोर्विस्मयपदं ममत्वेतांवाणींगुणकथनपुण्ये
नभवतःपुनामीत्यर्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता ३

गीपर्यंतयोनिष्ठावाचोगिरोनिर्मितवतःसुरगुरोरपिवाक् किं
तवविस्मयपदंआश्चर्यस्थानंभवतिअपितुनभवतीत्यर्थः किं
पुनःअस्मदादेःअहोपर्यवंताहिंकथंभूतोप्रवर्त्तसेसत्यंतुपुनः शिव
हेपुरमथनअस्मिन्स्तुतिलक्षणेर्थेममबुद्धिःइतिकारणात्व्यव ३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सितात्कृतोघमाद्रतीतिकिं अहंभयतः गुणकथनपुण्येनएतां आत्मीयोवाणींपुनामिपवित्रीकरोमि ३. तवैश्वर्यमिति आ त्मस्तुतेः सावकाशत्वंअभिधायस्वंप्रतिपाद्यइदानीसर्वज्ञत्वंस र्वकर्तृत्वंप्रतिकेचित्प्रतिपद्यंते मीमांसादयः तन्मतनिराक रणायअनवद्यप्रणामोपन्यासपरेणश्लोकत्रयेणभगवंतं

तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तं तिसृषुगुणभिन्नासुतनुषु अभव्यानामस्मिन्वरदरमणी यामरमणींविहंतुंव्याक्रोशींविदधतइहैकेजडधियः ४

नुनादेत्याह हेभगवन्हेवरद यतस्तवैश्वर्यंततव्यस्तंनिक्षिप्तंआ रोपितंवा कासुतिसृषुतनुषुकथंभूतासुगुणभिन्नासुगुणाः स त्वरजस्तमांसितैर्विभिन्नाःपृथग्भूताःगुणभिन्नाःकथंभूतंतवऐ श्वर्यंजगदुदयरक्षाप्रलयकृत् त्रयाणांजगतांउदयःउत्पत्तिःर

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ क्षापरिपालनंप्रलयोनाशश्चेतिभगवान्करोति इतिपुनः कथंभूतं
४ त्रयीशब्देनवेदत्रयीअथब्रह्मविष्णुरुद्रात्मकस्वरूपंहेभगवन् इह
५ मर्त्यलोकेएकेजडधियोमंदमतयःपापिष्ठाःमीमांसादयःतवैश्वर्यं
विहंतुंविस्फोटयितुंनिराकर्त्तुंव्याक्रोशीनिंदांविदधतेकुर्वंतिकथं
भूतांअभव्यानांपापिष्ठानांरमणीयांमनोरमांपुनःकथंभूतांअस्मि

किमीहः किंकायः सखलु किमुपायस्त्रिभुवनं
किमाधारोधातासृजतिकिमुपादानइतिच॥ ॥

न्सर्वज्ञादिगुणोपेतेनवैश्वर्येअरमणीं ४ इदानीतामेवव्याक्रो
शींप्रकटयन्नाह खलुनिश्चितंसधातासकर्त्तात्रिभुवनंसृजतिसधा
ताकिमीहःसन् त्रिभुवनंसृजतिभुवनजननेकाईहाचेष्टातथाकिंका
यःकिंशरीरःसन्सृजतितथाकिमुपायःसन्सृजतित्रिभुवनंकिंउपा शिव
दानंकिंकारणंकिंनिमित्तंअयमितिकुतर्कैःकांश्चिन्हतधियःमंदम ४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तीन्मुखरयतिवाचालयति किमर्थंजगतोमोहायविप्रतारणाय
नरकगमनायचकथंभूतःकुतर्कैःत्वयिविषयेअनवसरदुस्थः
दुर्बलःअतिअनवसरदुस्थःकथंभूतेत्वयिअतर्क्यैश्वर्ये अ
चिंत्यमहिम्नि यदुक्तं इच्छयाकुरुतेदेहमिच्छयाविनतुर्भवेत् भग
वान् क्रीडतेलोकेबालक्रीडनकैरिव ५ अजन्मानइति हेभगव
अतर्क्यैश्वर्येत्वय्यनवसरदुस्थोहतधियःकुतर्कोयं
कांश्चिन्मुखरयतिमोहायजगतः ५ अजन्मानोलोकाः
किमवयववंतोपिजगतामधिष्ठातारंकिंभवविधिरनादृ
त्यअमीभूर्भुवःप्रभृतयःसप्तलोकाःअवयववंतोपिकिंअजन्मा
नःएषांजन्मनविद्यते यत्सावयवत्वंतज्जन्मवत्वंयथाघटस्तथा
लोकाःसावयवाःसावयवत्वाज्जन्मवंतएव हेभगवन्भववि
धिसृष्टिविधानंजगतामधिष्ठातारंचेतनंनिमित्तकारणंईश्व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ रंकिंअनादृत्यअनपेक्ष्यभवतिनैवंकर्त्तारंअपेक्षतएवदिक्काल
५ धर्म्माधर्म्मपरमाणुप्रभृतीनिचेतनाशून्यानिचेतनानिधिष्ठा
5 तुःस्वीकृतानिस्वकार्योत्पत्तौप्रवर्त्तन्तेयत्चेतनाशून्यंतत्चेतनना
धिष्ठानस्वीकृतंकार्योत्पत्तौप्रवर्त्ततेवायदिअनीशःकुर्यात्मह
त्तर्हिभूतंकश्चित्कुर्यात्तदानस्यात्अनीशस्यभुवनजननेभुवनो

अनीशोवाकुर्याद्भुवनजननेकःपरिकरोय
तोमंदास्त्वांप्रत्यवरमरवरांसेरतइमे ६ ॥

त्पादनविधौकःपरिकरःकासामग्रीहेअमरवरयतःकारणा
त्इमेमंदाःपापिष्ठाःत्वांप्रतिसंशेरतेसंदेहंकुर्वंतित्वांप्रतिसंशा
योनास्तीतितात्पर्यार्थः ६ त्रयीसांख्यमिति त्रयीवेदविहि
तोमार्गःसांख्यंकापिलंशास्त्रंपंचविंशतितत्त्वोपलक्षितंयत शिव
थायोगःसंयोगःसमवायःविशेषणविशेष्यभावइतिसंयुक्त ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समवायःसंबंधःतस्यप्रधानत्वात् न्यायशास्त्रंवैशेषिकशास्त्रं
तथापशुपतिमतशब्देनसिद्धांताःप्रकीर्तिताःसोमसिद्धांतः
चंद्रसिद्धांतःशिवसिद्धांतःकुलसिद्धांतःपंचार्थसिद्धांतःइत्या
दयःतथावैष्णवंकेशवपंचरात्रनारदपंचरात्रयोर्ग्रहणंइतिशा
स्त्रःसमाप्तोवर्त्तते एतत्पंचसंख्यापरिच्छिन्नंप्रस्थानेएतस्मि

त्रयीसांख्यंयोगःपशुपतिमतंवैष्णवमितिप्रभिन्नेप्र ७
स्थानेपरमिदमदःपथ्यमितिच रुचीनांवैचित्र्यादृजुकु
टिलनानापथजुषांनृणामेकोगम्यस्त्वमसिपयसामर्णव इव

न्प्रस्थानेप्रभिन्नेसतिपथ्यकुमार्गेसतिअहंकारोपेतास्तदनुया
यिनःइतिब्रुवतेयदिदंपरमंतत्वंअभिन्नंपरमार्थतःतदेवरुचि
वैचित्र्यान्नानाशास्त्रंसमुपागतेहेभगवन्ऋजुकुटिलनानापथ
जुषांकोमलवक्रनानामार्गसेविनांनृणांएकस्त्वमेवगम्यो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ सिकइवअणीयइवयथाकजुकुटिलनानापथजुषांपयमाए
६ कोइणीयोगम्यस्तथात्वं ७ महोक्षइति हेवरदयत्तयतंत्रोप
६ करणंमात्रापरिचन्नगुहं तंत्रेइतियत् किंमहानुउक्षाः वृष
भोयस्यसः महोक्षः खट्वांगं प्रसिद्धमेवतत् अथवादंडस्योपरि
महोक्षः खट्वांगं परशुरजिनंभस्मफणिनः कपालं चेतीय
त्तयवरदत्तंत्रोपकरणं स्फुरास्तांनामस्थिरंदधतितुभवद्
प्रणिहितांनहिस्वात्मारामं विषयमृगतृष्णाभ्रमयति ८
ब्रलकपालंखट्वांगमुच्यते तथापरशुआयुधअविशेषः अ
जिनंगजचर्मतथाभस्मदग्धगोमयंतथाफणिनः सर्प्पाः का
द्रवेयाः तथाकपालं चइतिसमाहोवर्त्तते तुपुनः स्फुरादेवाभ
वद्प्रणिहितांभवद्भ्रक्षेपोपनीतां आनिर्वचनीयांऋद्धिंदध शिव
तिधारयंति अहंयद्येवंताहिस्वयंकस्मान्नभुंक्ते नैवंवाच्यंहि ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यस्मात्कारणात् विषयमृगतृष्णास्वात्मारामं पुरुषं परमयो।
गिनं न भ्रमयति न चालयति एतेन भगवतः परमयोगित्वं प्रक
टितं ८ ध्रुवमिति हे पुरमथन कश्चिद्ध्रुवदर्शी नानुयायी सक
लं समस्तं जगदिदं ध्रुवं गदति अविनश्वरं कथयति अथपरो
वा भट्टः क्षणभंगवादी सकलं जगदिदं अध्रुवं क्षणिकं गदति।
ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौ
व्ये जगति गदति व्यस्तविषये समस्तेप्येतस्मिन्पुरमथन
तैर्विस्मितइव स्तुवं जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ९
अथपरोऽन्यः क्षपणिकः वीतरागी योह्याद्वंभाः क्षणभंगवादी स
कलं जगदिदं क्षणिकं गदति ब्रूते अथपरोऽन्यः क्षपणकः वीत
रागी सकलं समस्तं जगदिदं ध्रौव्याध्रौव्ये गदति हे भगवन् एत
स्मिन्समस्ते जगति व्यस्तविषये -- विवक्षितप्रमाणे सत्यां अ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ हंतेभैर्द्दैवौद्वादिभिर्विस्मितइवविस्मयोत्सन्नोमोहमापितस्त्वां
७ स्तुवन्नजिह्रेमिलज्जांकरोमिअहोयद्येवंतर्हिकथंस्तुतोवर्ततेते
7 सत्यंखलुनिश्चयेनमुखरतावाचालतानधृष्टाअपितुधृष्टै
व ९ तवैश्वर्यमिति हेभगवन् विरिंचिर्ब्रह्माउपरितनपक्षेह
रिः क्रोडोऽधःपक्षेतवैश्वर्यंयत्नात्परिच्छेत्तुंपरिकलयितुंपरि
तवैश्वर्यंयत्नाद्यदुपरिविरिंचिर्हरिरधःपरिच्छेत्तुंयातावन
नलमनिलस्कंधवपुषः ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यां
माणंकर्त्तुंनाऽलंजातौअसमर्थौभूतौकथंभूतस्यतवअनिल
स्कंधवपुषःअनेनकिमुक्तंपातालपर्यंतंलिंगस्यमस्तकं
कैलासिपर्यंतंलिंगस्यमूलंब्रह्माचब्रह्माण्डव्याप्तिःविष्णुर्भग
वान्अपतत्यानिवासिनीकथमेतौतवैश्वर्यंपरिज्ञातुंसमर्थौ शिव
स्यातांइतिअपितुनभवतइत्यर्थः ततोनंतरंतेनभगवताता ७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भ्यांब्रह्मविष्णुभ्यां स्वयंतस्थे आत्मानं आत्मनैवप्रकटयामा
सकिं कुर्वन् भ्रांभक्तिभरोद्धाभरगुरु एवंयथाग्रगण्यायद्यस्मा
त्कारणात् भगवान्कारुणीकृत्यात्स्वयंतस्थे आत्मानं आत्मने
वप्रकटयामास हे गिरित्राण्युक्तमेतत् अनुवृत्तिस्तवसेवा किंन
फलति अपितुफलत्येवेत्यर्थः संगच्छति १० अयत्नादिति।
गिरित्रायत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्नफलति॥
१० अयत्नादासाद्यत्रिभुवनमवैरव्यतिकरं दशास्योयद
ह्वाहून्भृतरणकंडूपरवशान् शिरःपद्मश्रेणीरचित
हे भगवन् दशास्योरावणः बाहून्भृतवान् कथंभूतान्बाहून्
रणकंडूपरवशान् संग्रामव्यग्रानीत्यर्थः किंकृत्वा अवैरव्य
तिकरं निःकंटकं त्रिभुवनं अयत्नादासाद्यप्राप्यहे त्रिपुरहर
दं तत् स्थिरायास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचरणांभोरु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ हवलैः शिरांस्येव पङ्क्तानि तेषां श्रेणी पंक्तिस्तया रचिता रो
८ पिता चरणांभोरुहालवालिः पूजोपहारो यस्यां सा शिरःप
४ द्मश्रेणीरचितचरणांभोरुहबलिस्तस्याः स्फूर्जितं महिमा ॥
११ अमुष्येति हे भगवन् अमुष्य रावणस्य त्वदधिवसतो कै
लासेऽपि भुजवनं विक्रमयतः पातालेऽपि प्रतिष्ठा अलभ्या आ
चरणांभोरुहबलेः स्थिरायस्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जि
तमिदं ११ अमुष्य त्वत्सेवा समधिगतसारं भुजवनं ब
लात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः अलभ्या पाता
सीत् अप्राप्या बभूव कस्मात् बलात् कथंभूतं भुजवनं त्वत्से
वा समधिगतसारं प्राप्तबलं धकसति त्वयि अलसचलितांग
ष्ठशिरसि सति मंदचलितांगुष्ठाग्रे सति अहो युक्तमेतत् ध शिव
वं निश्चितं खलो जनः उपचितः परया लक्ष्म्या अलंकृतः स ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नू मुह्यतिमोहमुपगछति १२ ननाच्चित्रमिति हे वरदब्बाणः।
बाणासुरः सुत्रामन्नः इंद्रस्य ऋद्धिं अधः चक्रे कथंभूतां परमो
चैरपि संती अत्यंतमहतीमपि हे भगवन् तस्मिन्बाणेतन्नचि
त्रं आश्चर्य्यं न कथंभूतो बाणः परिजनविधेयत्रिभुवनः एत
त्ले प्युलसचलितांगुष्टशिरासि प्रतिष्टात्वय्यासीच्छचमु
पचितोमुह्यतिखलः १२ यदृद्धिंसुत्राम्णो वरदपरमो
च्चैरपि सतिमधश्चक्रे बाणः परिजनविधेयत्रिभुवनः
ननाचित्रं तस्मिन्वरिवसितरित्वच्चरणयोर्न कस्याप्यु
न्नत्यैभवतिशिरसस्त्वय्यवनति १३
द्धि त्रोपणं प्रथमं देयं पश्चादिनं कथंभूते बाणे त्वच्चरणयोर्वरि
वसितरि पूजयितरि हे भगवन्नयुक्तमेतत् त्वयि शिरसा अवन
तिनेम्रता वस्यापि उन्नत्यै न भवति अपितु सर्वैषामेव ऐश्वर्यमे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ हे त्रिनयन नयः कल्माषः कृष्णपांडुरो वर्णः यस्त्वं विषं संहृतवा
९ न्तः तव कंठे आसीत् स तव कंठे श्रियं न कुरुते अपितु करोत्ये
९ व कथंभूतस्य तव अकांडब्रह्मांडक्षयचकितदेवासुरकृपा।
विधेयस्य अकांडे अप्रस्तावे ब्रह्मांडक्षयेन जगत्प्रलयेन च
अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्यासी
घस्त्रिनयन विषं संहृतवतः सकल्माषः कंठे तव न कु
रुते न श्रियम् अहो विकारोपि श्लाघ्यो भुवनभयभंगव्यस
निनः १४ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
किं ता देवाः सुरास्त्रिपुरकृपाविधेयो कृपापरो यस्तस्य अहो युक्त
मेतत् भुवनभयभंगव्यसनिनः पुरुषस्य विकारोपि हि ताघ्यः १४
हे भगवन् यस्य स्मरस्य विशिखाः बाणाः सदेवासुरनरे निवर्त्त शिव
ते जगति असिद्धार्थाः प्रकृतप्रयोजनाः क्वचिदपि नैव निवर्त्तते ९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सः स्मरः सोऽपि नरसुरसाधारणो यथा भवति तथा अन्यदेवतु

त्वं सपत्नयन्स्मर्त्तव्यात्मा ऽभूत् स्मरणीयशरीरोऽभूत् कथंभू

ताः विशिखाः नित्यं जयिनः जयनशीलाः यद्वा जययुक्ताः अहो

युक्तमेतत् यच्छिषु जितेंद्रियेषु परिभवो न पथ्यः न हितकारी त्व

नि वर्त्तते नित्यं जगति जयिनो यस्य विशिखाः सपत्नयन्नी

सत्वाभि नरसुरसाधारणमभूत्स्मरः स्मर्त्तव्यात्मा न हि वशि

षु पथ्यः परिभवः १५ महीपादाघाताद्व्रजति सहसा सं

शयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं ॥

र्थः १५ महीपादाघातादिति हे भगवन् त्वं जगद्रक्षायै नटसि।

नृत्यं करोति महीपादाघातात् पादक्षेपात् चरणविन्यासात्

सहसा संशयपदं व्रजति किं भुस्यति किं अधः प्रविशति इति

संशयपदं तथा विष्णोः पदं आकाशं भ्राम्यद्भुजपरिघरुग्ण

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ ग्रहगणं वर्त्तते भ्राम्यद्भुजपरिघैरुग्णो भग्नो ग्रहसमूहं वर्त्तते तो
१० तथा द्यौः स्वर्गः मुहुर्मुहुर्वारंवारं दौस्थ्यं याति दुःखनी याति कथं
10 भूता द्यौः अनिभृतजटाताडिततटा नत्वहो युक्तमेतत् यतो विभु
त्वा वामैव वैपरीत्यं विभुत्वं १६ वियद्व्यापीति हे भगवन् यः वा

मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं न
टसि ननु वामैव विभुता १६ वियद्व्यापी तारागणगुणित
फेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ॥
जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृ
तमहिमा दिव्यं तव [illegible] वपुः १७

रां पानीयानां प्रवाहः स ते तव शिरसि पृषतलघुदृष्टः जलकणि
कावत्सूक्ष्मो दृष्टः कथंभूतः वियद्व्यापी व्योमप्राच्छादनशीलः पु शिव
नः कथंभूतः तारागणगुणितफेनोद्गमरुचिः ताराः नक्षत्राणि १०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तेषांगणः समूहः तेन गुणिता उपमिता फेनोद्गमस्य रुचिर्यस्य सः तेन प्रवाहेन जगद्द्वीपाकारंजलधिवलयं कृतं समुद्रपरिखं च कृतं हे ध्वलमहिम अमुनाप्रकारेण अनेनैव दृष्टांतेन तव वपुः उन्नेयं अनुमेयं उपमेयं कथंभूतं दिव्यं दिव्यप्रभावयुक्तं १७ रथः क्षोणीति हे भगवन् तेतव त्रिपुरतृणं दिधक्षोः अयं कः आडंबरविधिः

रथः क्षोणीयंता शतधृतिरगेंद्रो धनुरथो रथांगे चंद्रार्कौ रथ-चरणपाणिः शर इति दिधक्षोस्ते कोयं त्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीडंत्यो न खलु परतंत्राः प्रभुधियः १८

इयं कासामग्री इतीति किं क्षोणी पृथ्वी रथः यंता शतधृतिः ब्रह्मा अगेंद्रो पर्वतराजो हिमाचलो धनुः अथानंतरं रथांगे चक्रस्थाने चंद्रार्कौ तथा रथचरणपाणिर्विष्णुः शरः पात्यो द्वितीय पक्षे अहो युक्तमेतन् खलु निश्चयेन प्रभुधियः स्वामीबुद्धयः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ विधेयैः पदातिभिः सार्द्धं क्रीडत्यः नपरतंत्राः नपरायत्ताः स्वा
११ धिनाइत्यर्थः प्रभुर्यदिच्छति तन्नकरोतीति नास्य योर्थः १८ हरि
स्ते इति हे भगवन् हरिः कृष्णः ते तव पादयोः साहस्रं कमलब
लिं आधाय निक्षिप्य तस्मिन्साहस्रे एकोने सति निजं नेत्रक
मलं उद्धरन् उत्पाटितवान् असौ भक्त्युद्रेकः परिणतिगतास
हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मि
न्निजमुद्धरं नेत्रं कमलं गतो भक्त्युद्रेकः परिणतिमसौ
चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगतां १९
न् त्रयाणां जगतां रक्षायै जागर्त्ति स्फुरति केन चक्रवपुषा चक्रश
रीरेण १९ हे भगवन् जनो लोकः अतः कारणात् कर्म्मसु वि
षये दृढपरिकरो दृढारंभो वर्त्तते किं कृत्वा क्रतौ वेदमार्द्धां बद्धा पु शिव
नः किं कृत्वा त्वां क्रतुषु यागेषु फलदानप्रतिभुवं संप्रेक्ष्य क्रतौ ११

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यागेसुप्तेविनष्टेसतिफलयोगेफलसंबंधेत्वंजागरूकत्वमेवसा
वधानोभयसिक्रतुयागयाजिनांपुरुषाणांप्रध्वस्तेप्रनष्टेकर्म
पुरुषाराधनम्रतेविनाक्कफलतिअपितुनफलतीत्यर्थः २० ॥
क्रियादक्षेति हेशरणदहेअभयदरक्षोमुनिःक्रियादक्षःक्रियायां
कर्तौसुप्तेजाग्रत्त्वमसिफलयोगेक्रतुमतांक्वकर्मप्रध्वस्तंफ
लतिपुरुषाराधनम्रते अतस्त्वांसंप्रेक्ष्यक्रतुषुफलदानप्र
तिभुवंश्रुतौश्रद्धांबद्धाद्दढपरिकरःकर्मसुजनः २० क्रिया
दक्षोदक्षःक्रतुपतिरधीशस्तनुभ्रतामृषीणामार्त्विज्यंशर
णदशादस्याःसुरगणाः क्रतुभ्रंशस्त्वत्तःक्रतुषुफलदान
कुशलःतथाक्रतुपतिःतनुभ्रतांप्राणिनांअधीशःतथाऋषीणां
आर्त्विज्यंऋत्विग्भावस्तथासुरगणादेवसमूहाःसदस्याःसभ्याः
श्री एवंसामग्रीकस्यदक्षस्यत्वत्तस्त्वत्सकाशात्क्रतुभ्रंशोयागविनाशो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ वभूव कथंभूतात्वत्तः क्रतुषु फलदानव्यसनिनो हि यस्मात्कारणात्
१२ ध्रुवं निश्चितं मखाः यागाः कर्तुर्यजमानस्य श्रद्धाविधुरं श्रद्धाबा
12 ध्यं अभिचाराय भवंति विपरीतार्थाः भवंति २१ प्रजानाथमिति॥
हे नाथ हे स्वामिन् ते तव मृगव्याधरभसः आखेटकोत्साहः अमुं अ
व्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः २१
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिर
मयिषुमृष्यस्य वपुषा धनुष्पाणेर्यातं दिवमपि सपत्राकृ
तममुं त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः २२ ॥
भिकं कामुकं अपरं कथंभूतं सपत्राकृतं बाणभिन्नात्तकथितं अ
परं कथंभूतं त्रसंतं दिवमपि यातं यद्यपि प्रजानाथं ब्रह्माणं अद्या
पि न त्यजति कथंभूतस्य तव धनुष्पाणेः कथंभूतं प्रजानाथं प्रस शिव
भं बलात्कारेण रोहिद्भूतां रोहिणीभूतां स्वां दुहितरं ऋक्षस्य वपुषा १२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मृगशरीरेणगलंकिंकर्त्तुमिच्छुः रिरमयिषुं रमयितुमिच्छुं कथंभू
तं अद्यापित्रसंतंत्रसंतं दिवमपि स्वर्गेपिगतं पुनस्तेतवत्तथापि।
मृगव्याधरभसः अद्यापिप्रजानाथं नत्यजतीत्यर्थः २२. स्वलाव
ण्येति हेपुरमथनत्रिपुरदाहकरतथापिदेवी पार्वती स्त्रांस्त्रैण्यं
अवैतिजानातिकिंकृत्वायद्यपिपुष्पायुधंकंदर्प्पंपुरोऽग्रेऽअन्हा
स्वलावण्याशंसाधृतधनुषमह्नायतृणवत्पुष्टंदृष्ट्वा
पुरमथनपुष्पायुधमपि यदिस्त्रैणंदेवीयमनिरतदेहा
र्धघटनादवैतित्वामद्धावतवरदमुग्धायुवतयः २३. ॥
यस्मात्तीतृणवत्प्लुष्टंदग्धंदृष्ट्वापि कस्मात् यमनिरतदेहार्धे
घटनात् अर्धनारीशरीरसंपादनात् कथंभूतादेवीस्वलावण्या
शंसास्वस्वरूपाभिमानिनी अहोवत् इतिखेदे अद्धानिश्चितंहे
वरदमुग्धायुवतयः स्त्रियः अज्ञानाः संति २३. स्मशानेति।

म॰टी॰ युरसि त्वं हुतवहः अग्निरसि त्वमापः पानीयमसि त्वं व्योम आ
१४ काशः त्वमुधरणिरात्मा च मिति च इति शब्दः समाप्तो वर्त्त
ते हे भगवन् परिणताः परिपक्वबुद्धयः त्वयि विषये एवं पूर्वो
क्तप्रकारेण परिच्छिन्नां इत्यवधारितां यथा कलितां गिरं।
बिभ्रतु पुनः इह जगति वयं तत्तत्त्वं न विद्मः यत्त्वं न भव
त्यमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्यो
मत्वमु धरणिरात्मा त्वमिति च परिच्छिन्नामेवं त्वयि परिण
ताबिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि २६
सि यत्किंचित्सदसद्वा तत्सर्वं भगवानिति भगवद्व्यतिरिक्तं किं
चिन्नास्तीति तात्पर्यार्थः २६ त्रयीमिति हे शरणद ओं इति प
दं त्वां गृणाति स्तौति कथंभूतं ओं त्वां समस्तव्यस्तं समस्तव्याप शिव
कं किं कुर्वन् ॐ इति पदं त्रयी वेदत्रयीं अभिदधत् नकेवलां त्र १४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यीतिस्रो वृत्तिर्य्य उदात्तानुदात्तसमाहारभेदात् न केवलास्ति
स्त्रो वृत्ती त्रिभुवनं च स्वर्गमर्त्यपातालं च पुनः किं कुर्वन् अका
राद्यैः अकारोकारमकारैस्त्रिभिर्वर्णैस्त्रीनपि सुरान् ब्रह्मविष्णु
रुद्रानभिदधत् किं कुर्वाणो ओं इति पदं अणुभिर्ध्वनिभि
स्तेन यत्तुरीयं चतुर्थं धाम अवरुंधानं स्वीकुर्वन् किमुपेक्षया
त्रयीतिस्रो वृत्तीस्त्रिभुवमथो त्रीनपि सुरानकाराद्यैर्वर्णै
स्त्रिभिरभिदधत्ती लौविकृतिः तुरीयं ते धाम ध्वनिभिर २
वरुंधानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पद
तुरीयं च धामेति हृदयात् कंठं यावज्जाग्रदवस्थायाः व्याप्तिः कं
ठात् तालु पर्यंतं स्वप्नावस्थायाः व्याप्तिः नाल्यादि ललाटपर्यंतं
सुषुप्तावस्थाया व्याप्तिः ललाटाद्यं कुंडलिनीं प्राप्य शिवतत्त्वं
यावत्तुर्यावस्थाव्याप्तिस्तत्र अनाहतो नादो मुक्तिदः पारकी

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ त्तिनः कथंभूतंतेतवतुरीयंधामतीर्णविकृतिः तीर्णः परित्यक्तः
१५ विकारादयोयेनतत्तीर्णविकृतिः निर्विकारइत्यर्थः २७ भवइ
15 ति हेभगवन् हेदेवयदिदंतवाभिधानाष्टकं अमुष्मिन्नभिधानां
ष्टके श्रुतिर्वेदः प्रत्येकंप्रविचरतितत्किमभिधानाष्टकं भावः १
भवः शर्वोरुद्रः पशुपतिरथोग्रः सहमहांस्तथाभीमेशानावि
तियदभिधानाष्टकमिदं अमुष्मिन्प्रत्येकंप्रविचरतिदेवःश्रु
तिरपिप्रियायास्मैधाम्नेप्रणिहितनमस्योस्मिभवते २८॥
शर्वः २ रुद्रः ३ पशुपतिः ४ उग्रः ५ सहमहान् ६ भीमः ७ ईशानो ८
शब्देनाधाम्नेप्रियायप्रीत्यर्थंहेभगवन् एवंरूपायभगवतेतु
भ्यंप्रणिहितनमस्योस्मिकृतनमस्कारोस्मि २८ हेप्रियदवअ
भक्तानांप्रियंदुनोतिइतिप्रियदवतेतुभ्यंनमः नेदिष्ठायानिकट शिव
वर्त्तिनेनमः दविष्ठायचनमः दूरस्थायनमः हेस्मरहरतेतुभ्यंक्षो १५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दिष्ठायनमः क्षुद्रतरायसूक्ष्मतरायमहिष्ठायमहत्तमायगुरुत्त
मायचनमः हेत्रिनयनतुभ्यंवर्षिष्ठायचनमः वृद्धरूपायतथाय
विष्ठाययुवारूपायहेभगवन्तुभ्यंसर्वस्मैसर्वत्रकारणायनमः
तदितिवाक्योपसंहारेतुभ्यंसर्वायचनमः २९ बहुलरजसेति
नमोनेदिष्ठायप्रियदवदविष्ठायचनमः नमःक्षोदिष्ठायस्म
रहरमहिष्ठायचनमः नमोवर्षिष्ठायत्रिनयनयविष्ठायच
नमोनमःसर्वस्मैतेतदिदमितिसर्वायचनमः २९ बहुल
रजसेविश्वोत्पत्तौभवायनमोनमः प्रबलतमसेतत्संहारे
हेभगवन् विश्वोत्पत्तौबहुलरजसेप्रचुररजोधिष्ठानायभवाय
नमः तत्संहारेप्रबलतमसेप्रबलतमोगुणायहरायनमोनमः
सुखकृतेजनानांसुखकारणायसत्वोत्पत्तौसत्वगुणाधिष्ठा
त्रेमृडायनमोनमः निस्त्रैगुण्येगुणत्रयातीतायपरमहसिपदे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ मुक्तिस्थाने शिवाय नमो नमः ३० कृशपरिणतीति हे भगवन्
१६ भक्तिर्मां इत्यमुनाप्रकारेण चकितं भीतं असंदीकृत्य प्रोत्साह्य ते
16 तव चरणयोर्वाक्यपुष्पोपहारं आधात् रचितं इति किं इदं ते चेतः
क्वचाश्वदृद्धिः ध कथंभूतं चेतः कृशपरिणति परिणामदुर्बलं
हरायनमो नमः जनसुखकृते सत्वोत्सत्तौ मृडाय नमो न
मः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ३० कृश
परिणति चेतः क्लेशवश्यं क्वचेदं क्व च तव गुणसीमोल्लंघि
नी शश्वदृद्धिः इति चकितममंदीकृत्य मां भक्तिराधाद्वर
द चरणयोस्ते वाक्यपुष्पोपहारं ३१॥ ॥
पुनः कथंभूतं क्लेशवश्यं अविद्याअस्मितारागद्वेषाभिनिवेशाः
पंचक्लेशास्तेषां वश्यं क्लेशवश्यं विपरीतज्ञानं अविद्या भिन्न शिव
योर्बुद्धिरात्मनोरेकत्रप्रतीतिरस्मिता सुखेष्वाशक्तिरागः दुः १६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रवेषुप्रीतिर्द्वेषः अननुभूतादपि मरणादेस्त्रासोऽभिनिवे
शः इति क्लेशाः कथंभूता त्वमसिः गुणसिमोल्लंघिनी गुण
त्रयातीता ३१ असितेति हे वरद यदि असितगिरिसमं अं
जनगिरिसमं कज्जलं स्यात् सुरतरुवराणां कल्पवृक्षादी
असितगिरिसमस्यात्कज्जलंसिंधुपात्रेसुरतरुवर
शाखालेखनीपत्रमुर्वी लिखतियदिगृहीत्वाशार
दासर्वकालंतदपितवगुणानामीशपारंनयाति ३२
नां शाखा लेखनी स्यात् यदि शारदा देवी सरस्वती उर्वी पृ।
थ्वी पत्रं गृहीत्वा सर्वकालं लिखति तदपि तव गुणानां पारं
न यातीत्यर्थः ३२॥ ॥
असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गु
णस्येश्वरस्य सकलगुणवरिष्ठः पुष्पदंताभिधानो रुचिरम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ लघुवृत्तैः स्तोत्रमेतच्चकार ३३ अहरहरनवद्यं धूर्जटेः स्तोत्रमे
१७ तत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः स भवति शिवलोके
17 रुद्रतुल्यः सदात्मा प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च ३४
दीक्षा दानं तपस्तीर्थं होमयागादिकाः क्रियाः महिम्नस्तवपाठ
स्य कलां नार्हति षोडशीं ३५ समाप्तोयं समे स्तोत्रं सर्वमीश्वर
वर्णनं अनूपमं मनोहारी पुण्यं गंधर्वभाषितं ३६ महेशान्नाप
रो देवो महिम्नो नापरा स्तुतिः अघोरान्नापरो मंत्रो नास्ति तत्त्वं गु
रोः परं ३७ कुसुमदशननामा सर्वगंधर्वराजः शशिधरवर
मौलेर्देवदेवस्य दासः स खलु निजमहिम्नो भ्रष्ट एवास्य रोषा
त्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ३८ सुरवरमुनिपूज्यं
स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः व्रज शिव
ति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमिदममोघं पुष्पदंत १७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

म॰टी॰ प्रणीतं ३९ श्रीपुष्पदंतमुखपंकजनिर्गतेन स्तोत्रेण किल्बि
१८ षहरेण हरप्रियेण कंठस्थितेन पठितेन समाहितेन सुप्रीणि
तो भवति भूतपतिर्महेशः ४० इति श्रीपुष्पदंताचार्यविरचि
18 तं शिवमहिम्नः टीका स्तोत्र संपूर्णं शुभं भवतु श्रीरस्तु॥ ॥
मंगलं भगवान्विष्णुर्मंगलं गरुडध्वजः मंगलं पुंडरीकाक्षं मंग
लायतनो हरिः १ ॐ नमः शिवाय ७ ७ ७ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative